इन्द्रियायोग्यत्वात् तस्याद्दृष्टत्वम् । अदृष्टसत्त्वे प्रमाणञ्च । “सापेक्षत्वादनादित्वात् वैचित्र्यात् विश्ववृत्तितः । प्रत्यात्मनियमात् भुक्तेरस्ति हेतुरलौकिक” इति “चिरध्वस्तं फलायालं न कर्म्मातिशयं विनेति” चेति कुसु० । अस्याभिप्रायः । इह हि जगति उच्चावच विचित्राः सुखदुःखानुभवरूपा भोगाः प्रत्यात्मवेदनीयाः, ते च न नित्या उत्पत्तिविनाशशालित्वात् अतएव न सदातनाः किन्तु कादाचित्का एव, सति च तेषां कादाचित्कत्वे हेतुसापेक्षत्वमेव तथा हि विमता भोगव्यक्तयः हेतुसापेक्षाः कादाचित्कत्वात् घटवत् । यद्यत् कादाचित्कं तत्तत् हेतुसापेक्षं यथा घटः भवन्ति च भोगव्यक्तयः कादाचित्काः तस्मात् हेतुसापेक्षा इति पञ्चावयवन्यायेन भोगानां हेतुसापेक्षत्वसिद्धिः स च हेतुः न लौकिकप्रत्यक्षादिविषयः कश्चित् सम्भवति तदन्वयव्यतिरेकाभावात् न च कालस्यैव तद्धेतुत्वेनार्थान्तरापातः । कालस्य साधारणकारणतया विचित्रभोगं प्रत्यनियामकत्वात् अन्यथा कालस्यैकरूपतया सर्वदा सर्वभोगप्रसङ्गः । एतेन तत्तत्कालत्वेन कारणताकल्पनेऽपि न निस्तारः तत्तत्कालव्यक्तीनां पुरुषमात्रसाधारण्येन प्रत्यात्मविचित्रभोगोपपादकत्वानुपपत्तेः । अतो विचित्रभोगान्यथानुपपत्त्या तदाधायकमलौकिकं कारणं यत् कल्पनीयं, तदेवाद्दृष्टम् । एवमनुमानेन आगमप्रामाण्यानभ्युपगन्तॄन् प्रति अलौकिकादृष्टसाधनम् । आगमेन तु तत्सिद्धिरेवमभियुक्तैरभ्युपेता “स्वर्गकामो यजेतेति” वाक्ये समभिव्याहृतस्वर्गसाधनत्वं यागे विधिप्रत्ययेन बोध्यते तच्च न सम्भवति, स्वर्गादेः कालान्तरभावितया आशुविनाशिनो यागादेस्तदानीमसत्त्वेन कारणत्वासम्भवात् अतो विधिबोधितं यागादेरिष्टसाधनत्वं फलकालपर्य्यन्तस्थायिस्वजन्यव्यापारं विनानुपपन्नमित्यनुपपत्तिज्ञानेन द्वारीभूतमपूर्व्वं कल्प्यते । तदभिप्रायेणैव चिरध्वस्तमित्याद्युक्तम् । अतएव “पौरुषं दैवसम्पत्त्या काले फलति पार्थिव ! । त्रयमेतन्मनुष्यस्य पिण्डितं स्यात् फलावहमिति” शास्त्रान्तरे कार्य्यजननसामग्र्यां दैवपदाभिधेयापूर्व्वस्य कीर्त्तनम् । तच्चादृष्टं द्विविधं पुण्यं पापञ्च विहितानुष्ठानजन्यं पुण्यं, निषिद्धानुष्ठानजन्यं पापम्, तदुभयमपि त्रिविधं, प्रारब्धं फलदानोन्मुखं सञ्चितञ्चेति । देहाद्यारम्भकमदृष्टं प्रारब्धं, बहूनामदृष्टानां चिरसञ्चितानां मध्ये फलविपाकाय उन्मुखं फलदानोन्मुखं, तद्भिन्नं सञ्चितम् । तत्र “ये समर्था जगत्यस्मिन् सृष्टिसंहारकारकाः । तेऽपि कालेन लीयन्ते इति” शास्त्रात् “कलनात् सर्वभूतानां काल इत्यभिधीयते” इत्युक्तेश्च कालस्य सर्वनाशकत्वेऽपि नादृष्टनाशकत्वम् “नाभुक्तं क्षीयते कर्म्म कल्पकोटिशतैरपीति” शास्त्रान्तरात् किन्तु भोगादेव क्षयः । तथा पुण्यस्य कर्म्मनाशाजलस्पर्शादितोऽपि नाशः, पापस्य प्रायश्चित्तादिना नाशः । प्रारब्धातिरिक्तपुण्यापुण्यकर्म्मणां तत्त्वज्ञानात् नाशः । “ज्ञानाग्निः सर्वकर्म्माणि भस्मसात् कुरुतेऽर्जुनेति” गीतादिशास्त्रात् । इदमदृष्टं वेदान्तिभिर्नानुमन्यते तैर्हि कर्म्मणः सूक्ष्मावस्थापन्नसंस्कारविशेष एवादृष्टस्थानीयतयाङ्गीक्रियते इति भेदः । तच्चानुशयशब्दे विस्तरतो वाच्यम् । तच्चादृष्टमात्मधर्म्म इति नैयायिका वैशेषिकादयश्चाभ्युपगच्छन्ति । वेदान्तिसाङ्ख्यपातञ्जलास्तु बुद्धिधर्म इति भेदः । तेषां मते हि कर्त्तृत्वस्य बुद्धिधर्म्मतया “शास्त्रदेशितं फलमनुष्ठातरीति” न्यायात् तत्रैवादृष्टोत्पत्तेरुचितत्वम् अन्यकृतकर्म्मणा अन्यस्यादृष्टोत्पत्तौ अतिप्रसङ्गात् “कृतहानाकृताभ्यागमप्रसङ्गश्चेति” सूत्रेण च तथैव प्रतिपादितत्वादधिकमाकरे द्रष्टव्यम् । अस्य च अदृष्टशब्दवाच्यत्वे “प्रत्यक्षमनिमित्तं विद्यमानोपलम्भनत्वादिति” जैमिनिसूत्रं मानम् । तस्यायमभिप्रायः “नोदनालक्षणोऽर्थो धर्म्म” इति धर्म्मे वेदैकसमधिगम्यत्वमुपक्षिप्तं तस्य द्रढीकरणार्थमिदं सूत्रं प्रवृत्तम् । “अनुष्ठानादूर्द्ध्वमुत्पद्यमानस्य धर्म्मस्य पूर्व्वमविद्यमानत्वात् न प्रत्यक्षयोग्यतास्ति उत्तरकालेऽपि रूपादिराहित्यान्नेन्द्रियैरवगम्यता । अतएवादृष्टमिति सर्वैरभिधीयते” इति क्ष० भाष्यम् । सूत्रार्थस्तु प्रत्यक्षं चक्षुरादि न तद्ग्रहणे निमित्तं तेषां विद्यमानोपलम्भहेतुत्वात् धर्म्मस्य च प्राक् अविद्यमानत्वात् । लिङ्गराहित्याच्च नानुमानविषयत्वमप्यस्ति । सुखदुःखयोस्तज्जन्यत्वेन लिङ्गत्वसम्भवेऽपि तयोर्लिङ्गत्वज्ञानमपि वेदैकगम्यं, “कस्य कर्म्मणः ? किं फल ? मित्यध्यवसायस्य वेदैकसमधिगम्यत्वात् सुखदुःखाभ्यां सामान्येन धर्म्माधर्म्ममात्रानुमानेऽपि तद्विशेषप्रतिपत्तौ वेदस्यैव साधनत्वादिति प्रतिज्ञातं धर्म्मस्य नोदनामात्रप्रमापकत्वं सुस्थितमिति । दृष्टभिन्ने त्रि० “सर्वमदृष्टं शुचीति” स्मृत्यन्तरम् । “अदृष्टमप्यर्थमदृष्टवैभवात् करोति सुप्तिर्जनदर्शनातिथिमिति” नैष० । अज्ञातमात्रे त्रि० । “अदृष्टविरहव्यथमिति” । हितो० । “अदृष्टमङ्गिनिर्णिक्तमिति” स्मृतिः “अदृष्टमुपघातशङ्काभिरक्षातमिति” रघु० । अदृष्टहेतुके भयादौ च । दैविकाग्निभयादेरदृष्टसाध्यत्वाददृष्टत्वम् ।